श्री हयग्रीव स्तोत्रं

श्री हयग्रीव स्तोत्रं

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी |
वेदांताचार्यवर्यो मे सन्निधत्तां सदा हृदि ||

ज्ञानानंदमयं देवं निर्मलस्फटिकाकृतिं |
आधारं सर्वविद्यानां हयग्रीवमुपास्महे || 1 ||

स्वतः सिद्धं शुद्धस्फटिकमणिभूभृत्प्रतिभटं
सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनं |
अनंतैस्त्रय्यंतैरनुविहितहेषाहलहलं
हताशेषावद्यं हयवदनमीडीमहि महः || 2 ||

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः |
कथादर्पक्षुभ्यत्कथककुलकोलाहलभवं
हरत्वंतर्ध्वांतं हयवदनहेषाहलहलः || 3 ||

प्राची संध्या काचिदंतर्निशायाः
प्रज्ञादृष्टेरंजनश्रीरपूर्वा |
वक्त्री वेदान् भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः || 4 ||

विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनबद्धदीक्षं |
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये || 5 ||

अपौरुषेयैरपि वाक्प्रपंचैः
अद्यापि ते भूतिमदृष्टपारां |
स्तुवन्नहं मुग्ध इति त्वयैव
कारुण्यतो नाथ कटाक्षणीयः || 6 ||

दाक्षिण्यरम्या गिरिशस्य मूर्तिः
देवी सरोजासनधर्मपत्नी |
व्यासादयोऽपि व्यपदेश्यवाचः
स्फुरंति सर्वे तव शक्तिलेशैः || 7 ||

मंदोऽभविष्यन्नियतं विरिंचो
वाचां निधे वंचितभागधेयः |
दैत्यापनीतान् दययैव भूयोऽपि
अध्यापयिष्यो निगमान् न चेत् त्वं || 8 ||

वितर्कडोलां व्यवधूय सत्त्वे
बृहस्पतिं वर्तयसे यतस्त्वं |
तेनैव देव त्रिदेशेश्वराणां
अस्पृष्टडोलायितमाधिराज्यं || 9 ||

अग्नौ समिद्धार्चिषि सप्ततंतोः
आतस्थिवान् मंत्रमयं शरीरं |
अखंडसारैर्हविषां प्रदानैः
आप्यायनं व्योमसदां विधत्से || 10 ||

यन्मूलमीदृक् प्रतिभाति तत्त्वं
या मूलमाम्नायमहाद्रुमाणां |
तत्त्वेन जानंति विशुद्धसत्त्वाः
त्वामक्षरामक्षरमातृकां त्वां || 11 ||

अव्याकृताद्व्याकृतवानसि त्वं
नामानि रूपाणि च यानि पूर्वं |
शंसंति तेषां चरमां प्रतिष्ठां
वागीश्वर त्वां त्वदुपज्ञवाचः || 12 ||

मुग्धेंदुनिष्यंदविलोभनीयां
मूर्तिं तवानंदसुधाप्रसूतिं |
विपश्चितश्चेतसि भावयंते
वेलामुदारामिव दुग्धसिंधोः || 13 ||

मनोगतं पश्यति यः सदा त्वां
मनीषिणां मानसराजहंसं |
स्वयं पुरोभावविवादभाजः
किंकुर्वते तस्य गिरो यथार्हं || 14 ||

अपि क्षणार्धं कलयंति ये त्वां
आप्लावयंतं विशदैर्मयूखैः |
वाचां प्रवाहैरनिवारितैस्ते
मंदाकिनीं मंदयितुं क्षमंते || 15 ||

स्वामिन् भवद्ध्यानसुधाभिषेकात्
वहंति धन्याः पुलकानुबंधं |
अलक्षिते क्वापि निरूढमूलं
अंगेष्विवानंदथुमंकुरंतं || 16 ||

स्वामिन् प्रतीचा हृदयेन धन्याः
त्वद्ध्यानचंद्रोदयवर्धमानं |
अमांतमानंदपयोधिमंतः
पयोभिरक्ष्णां परिवाहयंति || 17 ||

स्वैरानुभावास्त्वदधीनभावाः
समृद्धवीर्यास्त्वदनुग्रहेण |
विपश्चितो नाथ तरंति मायां
वैहारिकीं मोहनपिंछिकां ते || 18 ||

प्राङ्निर्मितानां तपसां विपाकाः
प्रत्यग्रनिःश्रेयससंपदो मे |
समेधिषीरंस्तव पादपद्मे
संकल्पचिंतामणयः प्रणामाः || 19 ||

विलुप्तमूर्धन्यलिपिक्रमाणां
सुरेंद्रचूडापदलालितानां |
त्वदंघ्रिराजीवरजःकणानां
भूयान् प्रसादो मयि नाथ भूयात् || 20 ||

परिस्फुरन्नूपुरचित्रभानु-
-प्रकाशनिर्धूततमोनुषंगं |
पदद्वयीं ते परिचिन्महेऽंतः
प्रबोधराजीवविभातसंध्यां || 21 ||

त्वत्किंकरालंकरणोचितानां
त्वयैव कल्पांतरपालितानां |
मंजुप्रणादं मणिनूपुरं ते
मंजूषिकां वेदगिरां प्रतीमः || 22 ||

संचिंतयामि प्रतिभादशास्थान्
संधुक्षयंतं समयप्रदीपान् |
विज्ञानकल्पद्रुमपल्लवाभं
व्याख्यानमुद्रामधुरं करं ते || 23 ||

चित्ते करोमि स्फुरिताक्षमालं
सव्येतरं नाथ करं त्वदीयं |
ज्ञानामृतोदंचनलंपटानां
लीलाघटीयंत्रमिवाश्रितानां || 24 ||

प्रबोधसिंधोररुणैः प्रकाशैः
प्रवाळसंघातमिवोद्वहंतं |
विभावये देव सपुस्तकं ते
वामं करं दक्षिणमाश्रितानां || 25 ||

तमांसि भित्त्वा विशदैर्मयूखैः
संप्रीणयंतं विदुषश्चकोरान् |
निशामये त्वां नवपुंडरीके
शरद्घने चंद्रमिव स्फुरंतं || 26 ||

दिशंतु मे देव सदा त्वदीयाः
दयातरंगानुचराः कटाक्षाः |
श्रोत्रेषु पुंसाममृतं क्षरंतीं
सरस्वतीं संश्रितकामधेनुं || 27 ||

विशेषवित्पारिषदेषु नाथ
विदग्ध गोष्ठीसमरांगणेषु |
जिगीषतो मे कवितार्किकेंद्रान्
जिह्वाग्रसिंहासनमभ्युपेयाः || 28 ||

त्वां चिंतयन् त्वन्मयतां प्रपन्नः
त्वामुद्गृणन् शब्दमयेन धाम्ना |
स्वामिन् समाजेषु समेधिषीय
स्वच्छंदवादाहवबद्धशूरः || 29 ||

नानाविधानामगतिः कलानां
न चापि तीर्थेषु कृतावतारः |
ध्रुवं तवानाथपरिग्रहायाः
नवं नवं पात्रमहं दयायाः || 30 ||

अकंपनीयान्यपनीतिभेदैः
अलंकृषीरन् हृदयं मदीयं |
शंकाकळंकापगमोज्ज्वलानि
तत्त्वानि सम्यंचि तव प्रसादात् || 31 ||

व्याख्यामुद्रां करसरसिजैः पुस्तकं शंखचक्रे
बिभ्रद्धिन्नस्फटिकरुचिरे पुंडरीके निषण्णः |
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन् मां
आविर्भूयादनघमहिमा मानसे वागधीशः || 32 ||

वागर्थसिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या |
कवितार्किककेसरिणा वेंकटनाथेन विरचितामेतां || 33 ||

कवितार्किकसिंहाय कळ्याणगुणशालिने |
श्रीमते वेंकटेशाय वेदांतगुरवे नमः ||

इति श्रीवेदांतदेशिक कृत श्री हयग्रीव स्तोत्रं |